Postal Regd.No. GAMC- 1553/2022-2024

ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १७ अङ्क : २००
जान्युआरी - २०२३

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### शरणागतेः सौन्दर्यम्

विश्वस्य सर्वेषु धर्मेषु बहुत्र परस्परं भिन्नता दृश्यते । क्वचित् सूर्यस्य उपासना क्रियते, अपरत्र च चन्द्रस्य माहात्म्यं वर्ण्यते। तथैव कुत्रचित् मूर्तिपूजा महत्त्वं वहति, अन्यत्र वा अमूर्तं प्रति श्रद्धा दृश्यते। एतेषु विरोधेषु सत्सु अपि, परमतत्त्वं प्रति शरणं सर्वत्र समानं वर्तते । वस्तुतः शरणं ज्ञानिनं, कर्मयोगिनं भक्तं च निर्विवादं स्पृशति । वल्लभाचार्यः शरणस्य षट् लक्षणानि वर्णयति।

श्रद्धालुना मनुष्येण ईश्वरेण सह अनुकूलेन भवितव्यम्। ईश्वरः स्वयं सदा अनुकूलः वर्तते। (अतः एव विष्णोः नाम 'अनुकूलः' अपि विद्यते ।) परन्तु प्रतिकूलाः वयं तेन सह संवादसेतुं रचयितुं नितराम् असमर्थाः स्मः । ईश्वरेच्छा बलीयसी इति लोकोक्तिम् आचरन् भक्तः प्रभुनिर्मितेन प्रवाहेण सह आत्मानं वाहयति।

प्रतिकूलतायाः त्यागेन विना भक्तिः समग्रतया न विलसति। मनुष्यस्य अन्तिमे वयसि दृष्टेः तेजः क्षीयते। तदा जीवने प्रतिकूलतायाः अनुभवः जायते । भक्तः अस्यां स्थितौ प्रतिकूलतायाः दुःखदं चिन्तनं परित्यज्य ईश्वरस्य ध्याने मग्नः भवति। सन्निहिते कष्टे अपि प्रभोः सान्निध्यं कथं प्राप्तव्यम् इति भक्तः जानाति।

ईश्वरः मां रक्षिष्यति इति हृदयवृत्तिः शरणस्य सौन्दर्यं पुनः अलङ्करोति। सामान्यः मनुष्यः आपत्तिकाले कस्य स्मरणं कर्तव्यम् इति न जानाति । कारागृहे पतितः आक्षारितः जनः प्रायः बलवन्तं राजनेतारं स्मरति । परन्तु भक्तस्य एकमेव जीवनसूत्रं वर्तते – 'श्रीकृष्णः शरणं मम।'

ईश्वरः मम स्वामी (नाथः) अस्ति इति निश्चयात्मिका मतिः भक्तस्य प्रच्छन्नं सौन्दर्यं वर्धयति । कस्य पुरतः नमनं करणीयम् इति मन्दः मनुष्यः न जानाति। तेन कारणेन केचन धूर्ताः वञ्चयितुं वशीकर्तुं वा अवसरं लभन्ते। धूर्तानाम् अपि कश्चित् 'स्वामी' अस्ति। सः प्रभुः एव। तस्य पुरतः विहितं नमनम् उपासनायाः औन्नत्यं वर्धयति।

अहङ्कारस्य समर्पणं भक्तेः लक्षणं वर्तते। यः मनुष्यः ईश्वरम् एव 'सर्वस्वम्' मन्यते, तस्मिन् अहङ्कारः स्थातुं न शक्नोति। प्रयाते अहङ्कारे मनुष्यः ईश्वरस्य पुरतः पूर्णभावेन विवृतः (निर्वस्त्रः) भवति। एतादृशः भक्तः ईश्वरस्य प्रियः भवति। कार्पण्यम् (दैन्यम्) अपि भक्तस्य जीवनं पुष्पितं करोति। दीनता ईश्वरस्य पुरतः एव शोभते। अस्थाने दैन्येन कृतं नमनं मनुष्यस्य गौरवं हन्ति। एतानि सर्वाणि लक्षणानि एकस्मिन् पद्ये एवं सङ्ग्रथितानि वर्तन्ते –

**आनुकूलस्य सङ्कल्पः प्रातिकूलस्य वर्जनम् ।**
**रक्षिष्यतीति विश्वासो गोप्तृत्वे वरणं तथा आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः ॥**

आक्षारितः – falsely accused

# आत्मीयः सुहृत्

प्राचीने काले ब्रह्मदत्तः यदा काशीराज्यं परिपालयन् आसीत् तदा बोधिसत्त्वः कस्मिंश्चित् ब्राह्मणकुले जननं प्राप्तवान् आसीत्। मातापितरौ तस्य नाम सत्यानन्दः इति निश्चितवन्तौ। द्वित्राणां वर्षाणाम् अनन्तरं तस्य मातापितृभ्याम् अपरः अपि पुत्रः प्राप्तः। तस्य नाम निश्चितं नित्यानन्दः इति।

यावत् तौ पुत्रौ प्राप्तवयस्कौ जातौ तावता तयोः मातापितरौ स्वर्गस्थौ जातौ । एतस्मात् जीवने विरक्तिं प्राप्तवन्तौ तौ गङ्गातीरे कुटीरं निर्माय संन्यासजीवनम् आरब्धवन्तौ। गङ्गानद्याः एकस्मिन् तीरे एकस्य कुटीरम् आसीत्। अपरस्मिन् तीरे अपरस्य कुटीरम्।

कदाचित् पाताललोकवासी सर्पराजः मणिकान्तः मानवरूपं धृत्वा भूलोकम् आगतवान्, गङ्गातीरे सञ्चारम् आरब्धवान् च । तदवसरे तेन नित्यानन्दस्य कुटीरं दृष्टम् । अल्पे एव वयसि संन्यासजीवनम् आरब्धवन्तं नित्यानन्दं दृष्ट्वा सः नितराम् आश्चर्यचकितः। सः नित्यानन्दं स्वस्य परिचयम् उक्त्वा तेन सह वार्तालापम् आरब्धवान्।

गच्छता कालेन तयोः महती मैत्री प्रवृद्धा। मणिकान्तः प्रतिदिनं नित्यानन्दस्य कुटीरम् आगच्छति स्म। दिने काश्चन घण्टाः यावत् तौ सर्वान् विषयान् अधिकृत्य वार्तालापं कुरुतः स्म । मणिकान्तः कदाचित् वास्तविकं रूपं धृत्वा नित्यानन्दस्य उपरि फणां प्रसार्य शीतलां छायां परिकल्पयति स्म।

एवमेव कानिचन वर्षाणि अतीतानि। कदाचित् नित्यानन्दस्य मनसि सन्देहः उत्पन्नः यत् सुहृत् अपि अयं यदि कदाचित् कुपितः भवेत् तर्हि मां दशेत् अपि इति। कोपसमये सर्पकुलीयाः मैत्रीं न परिगणयन्ति इति सः जानाति स्म।

एतम् अंशं चिन्तयतः नित्यानन्दस्य मनः नितराम् अशान्तं जातम् । अतः सः गङ्गाम् अतिक्रम्य अग्रजं सत्यानन्दं द्रष्टुं गतवान् । अनुजस्य दर्शनमात्रेण सत्यानन्दः अपृच्छत् – "भ्रातः ! भवतः मुखे किमर्थम् आतङ्कः दृश्यते ? किं वा प्रवृत्तम् ?" इति।

तदा नित्यानन्दः प्रवृत्तं सर्वम् अश्रावयत्। सर्वं श्रुत्वा सत्यानन्दः अपृच्छत् – "भ्रातः ! भवतः कथनात् ज्ञायते यत् भवान् मणिकान्तस्य आत्मीयः सुहृत् इति । कदाचित् ततः हानिः भवेत् इति भवतः मनसि आतङ्कः अपि । यदि मणिकान्तः भवतः कुटीरं न आगच्छेत् तर्हि किं भवान् निश्चिन्ततया स्थातुं शक्नुयात् ?" इति।

नित्यानन्दः क्षणं यावत् विचिन्त्य अवदत् – "प्रायः तस्य अनागमनात् एव मम चिन्ता परिहृता भवेत् इति भाति । किन्तु तस्य आगमनं कथं निवारणीयम् इति न ज्ञायते । मम गृहं मा आगच्छतु इति मित्रम् उद्दिश्य कथनम् अयुक्तम् इति मम चिन्तनम्" इति।

एतत् श्रुत्वा हसन् पृष्टवान् सत्यानन्दः –"अनुज ! भवत्समीपम् आगच्छन् मणिकान्तः कीदृशानि आभरणानि धरति ?" इति।

"तस्य शरीरं तु विविधैः आभरणैः विभूषितं भवति । तेषु तस्य कण्ठे कान्त्या शोभमानः कश्चन विशिष्टः मणिः तु नितराम् अमूल्यः" इति अवदत् नित्यानन्दः।

“अग्रिमे अवसरे यदा मणिकान्तः भवत्समीपम् आगमिष्यति तदा भवान् तं मणिं याचतु। ततः भवतः समस्या परिहृता भविष्यति” इति अवदत् सत्यानन्दः।

एतस्याः घटनायाः द्वित्राणां दिनानाम् अनन्तरं मणिकान्तः नित्यानन्दस्य कुटीरं प्रति आगतः। तदा नित्यानन्दः तस्य कण्ठे विराजमानम् अमूल्यं मणिम् अयाचत। एतस्मात् असन्तुष्टः मणिकान्तः विना प्रतिवचनं ततः निर्गतवान्।

अनन्तरदिने अपि मणिकान्तः नित्यानन्द-कुटीरं प्रति आगतवान्। तदवसरे नित्यानन्दः कुटीरस्य द्वारे एव आसीत्। सः मणिकान्तम् अपृच्छत् – “ह्यः मया अमूल्यः मणिः याचितः आसीत्। किन्तु भवता सः न दत्तः। किमर्थम्?” इति।

एतस्मिन् अपि दिने मणिकान्तः कुटीरम् अप्रविश्य एव विना वचनं ततः प्रतिगतवान्।

तृतीये अपि दिने यदा मणिकान्तः कुटीरसमीपम् आगतवान् तदा नित्यानन्दः अग्रे गत्वा अपृच्छत् – “मया द्विवारं मणिः याचितः। तथापि भवता मणिः तु न दत्तः। अद्य वा मणिः दीयते उत न?” इति।

तदा मणिकान्तः औदासीन्यपूर्णेन स्वरेण – “नित्यानन्द! एषः मणिः असाधारणः। कामधेन्वायते एषः। अहं यत् इच्छामि तत् दातुं समर्थम् एतं मणिम् अहं कदापि कस्मैचिदपि न दास्यामि। तादृशं मणिम् एव याचमानं भवन्तं धिक्। इतः परं भवतः कुटीरं प्रति न आगमिष्यामि अहम्” इति उक्त्वा ततः निर्गतवान्।

एतदनन्तरं सप्ताहं यावत् मणिकान्तस्य प्रतीक्षां कृतवान् नित्यानन्दः। तथापि मणिकान्तः तु न आगतः। एतस्मात् नित्यानन्दस्य चिन्ता प्रवृद्धा। ‘मणिं याचन् अहम् उत्तमस्य मित्रस्य सहवासतः वञ्चितः अभवम्’ इति चिन्तयन् सः नितरां खिन्नः जातः।

तेषु एव दिनेषु अनुजस्य दर्शनाय सत्यानन्देन नित्यानन्दस्य कुटीरं प्रति आगतम्। चिन्ताकारणतः नितरां कृशतां प्राप्तवन्तम् अनुजं दृष्ट्वा सः अवदत् – “भवतः कृशता अधिका जाता दृश्यते। किं भवता मम कथनं न अनुसृतम्? किम् इतोऽपि सर्पराजात् भवता मुक्तिः न प्राप्ता?” इति।

“भ्रातः! भवतः कथनस्य अनुगुणं मया मणिः प्रार्थितः। तस्मात् दिनात् सः मम कुटीरं प्रति आगमनं परित्यक्तवान्। यदि सः पूर्ववत् एव मम कुटीरं प्रति आगमिष्यत्, मम शिरसि फणां यदि प्रासारयिष्यत् तर्हि मम महान् आनन्दः अभविष्यत्। तस्य अदर्शनात् इदानीं मम मनः नितराम् अशान्तम् अस्ति। तस्मात् एव मम कृशता प्रवृद्धा अस्ति” इति नित्यानन्दः अवदत्।

तदा सत्यानन्दरूपेण स्थितः बोधिसत्त्वः अवदत् – “अनुज! सर्पराजं मणिकान्तं भवान् आत्मीयं सुहृदं भावितवान्। तादृशः सः मणियाचनामात्रेण भवतः सहवासम् एव परित्यक्तवान्। किम् आत्मीयस्य सुहृदः व्यवहारः एवं भवितुम् अर्हति? सः भवत्तः दूरं गतः यत् तत् तु भवतः एव हिताय। अतः एतद्विषये अल्पा अपि चिन्ता करणीया नास्ति भवता” इति। अग्रजस्य सत्यानन्दस्य वचने सत्यता अस्ति इति अवगच्छन् नित्यानन्दः सर्पराजस्य विषये चिन्तनं परित्यक्तवान्। ततः अचिरात् एव सः यथापूर्वं स्वस्थः जातः।

– **जातककथा**

## ग्रन्थपरिचयः ( मध्यमव्यायोगः )

व्योम शाहः

( अनुवर्तते)

ज्येष्ठस्य पुत्रस्य अतीव आग्रहः आसीत्, किन्तु प्रियतमत्वात् सः पित्रा निवारितः । ब्राह्मणस्य अनुकरणं कुर्वती ब्राह्मणी कनिष्ठं पुत्रं समर्पणाद् न्यवारयत् । अस्मिन् अवसरे द्वितीयेन प्रोक्तम् – ''पित्रोः अनिष्टः कस्य इदानीं प्रियः ?'' इत्थं स्वकीयं गमनं विज्ञाय गुरुप्राणरक्षणेन आत्मानं धन्यं मन्यमानः सः भ्रातरौ पितरौ च अभिवाद्य घटोत्कचं प्रति गतवान् । पिपासितः द्वितीयः ब्राह्मणः पिपासां निवारयितुं निकटस्थं जलाशयं गन्तुम् इच्छां घटोत्कचं प्रति प्रकटितवान् । घटोत्कचोऽपि अनुमतिम् अददात् । किञ्चित् कालानन्तरं यदा ब्राह्मणपुत्रः न आगमत्, तदा सः ज्येष्ठं पुत्रं द्वितीयस्य ब्राह्मणपुत्रस्य नाम अपृच्छत् । तस्य नाम विज्ञाय ''भोः मध्यम ! भोः मध्यम !'' इति नादं तम् आह्वातुं कृतवान् । व्यायामव्यापृतः भीमसेनः इमं नादं श्रुतवान् । सः स्वीयं बन्धुषु मध्यमं विज्ञाय झटिति तत्र आगच्छत् । अन्योन्यम् अजानतोः पितापुत्रयोः भीमघटोत्कचयोः इदं मेलनं महाकविना भासेन प्रपञ्चितम् । घटोत्कचः तादृश्या आकृत्या युक्तं भीमं दृष्ट्वा चकितः । मध्यमे (ब्राह्मणपुत्रे) आहूते सति कथम् एषः पुरुषः आगतः इति शङ्कां निवारयितुं सः भीमं पृष्टवान् – ''भवान् अपि मध्यमः ?'' ''**मध्यमोऽहम् अवध्यानाम् उत्सिक्तानां च मध्यमः ।**
**मध्यमोऽहं क्षितौ भद्र ! भ्रातृणाम् अपि मध्यमः ॥**''

यावता भीमः इदं प्रतिवचनम् अकरोत्, तावता कालेन द्वितीयः ब्राह्मणबटुः (मध्यमः) तत्र समागच्छत् । ततः उभौ घटोत्कच – मध्यमौ गन्तुम् उद्यतौ । बलवन्तं भीमं स्वस्य परिवारस्य रक्षणे समर्थं विज्ञाय ब्राह्मणः सर्वम् अपि घटोत्कचत्रास–वृत्तान्तं भीमाय न्यवेदयत् । इदं वृत्तं ज्ञात्वा भीमः मध्यमं रक्षितुं घटोत्कचस्य मार्गं रुद्धवान् । भीम–घटोत्कचयोः तीव्रं वाग्युद्धम् आरब्धम् । भीमः घटोत्कचं मोक्तुम् आज्ञापितवान् । घटोत्कचः स्वस्य निर्णये तटस्थः । सः उक्तवान् यत् यदि तस्य पिता अपि तम् आज्ञापयिष्यत्, तथाऽपि सः ब्राह्मणबटुं न अमोक्ष्यत् । कारणं यत् सः पुरुषः मातुः आज्ञया निगृहीतः ।

जनन्याः आज्ञावशेन पाण्डवाः कीदृशीं दशां प्राप्ताः इति भीमः अचिन्तयत् । सः कौतुकेन तस्य मातुः नाम अपृच्छत् । तेन अपि सद्यः एव उक्तं 'हिडिम्बा' इति । भीमः तद्वचः श्रुत्वा हृष्टः । भीमः घटोत्कचात् मध्यमं मुक्त्वा वृद्धाय आर्पयत् । क्रुद्धः घटोत्कचः भीमम् एव नेतुं निश्चयं कृतवान् । 'यदि ते शक्तिः अस्ति, बलात्कारेण मां नय' इति भीमोऽपि आह्वानं कृतवान् । 'क्षत्रियः अस्मि अतः भयं न जानामि । त्वत्तः ज्ञातुम् इच्छामि' इति ।

घटोत्कचः भीमं स्वीयम् आयुधं ग्रहीतुम् आदिशत् । दक्षिणबाहुः एव तस्य आयुधम् इति ज्ञात्वा सः अनुमानम् अकरोद् यत् तादृशं वचनं तस्य पितुः भीमसेनस्य एव भवितव्यम् । भीमोऽपि उपहसितुम् अपृच्छत् – 'कोऽयं भीमः ?' सः केन तुल्यः ? शिवेन, कृष्णेन ब्रह्मणा शक्रेण शक्तिधरेण यमेन वा ? घटोत्कचः साभिमानम् अवदत् 'सर्वैः' इति । 'धिगनृतमेतत्' इति भीमेन प्रोक्तम् ।

पितुः विषये आक्षेपं श्रुत्वा घटोत्कचः क्रुद्धः सन् वृक्षम् उत्पाट्य भीमसेनं प्रति अक्षिपत् । तस्य प्रयासः निष्फलः । सः पुनरपि गिरिम् उत्पाट्य भीमं प्रति अक्षिपत् । तेन अपि भीमः न हतः । उभौ नियुद्धं कृतवन्तौ । तत्रापि

घटोत्कचः निष्फलः । अन्यम् उपायं न जानन् सः भीमं मातृप्रसादाद् लब्धेन मायापाशेन अबध्नात् । भीमसेनः महेश्वरप्रसादाद् लब्धं मायापाश-मुक्ति-मन्त्रम् अजपत् ब्राह्मणस्य च कमण्डलुजलम् अपिबत् । तेन सः मायापाशाद् मुक्तोऽभवत् । घटोत्कचः तं पूर्वसमयं स्मारितवान् । ततः उभौ हिडिम्बागृहम् अगच्छताम् । ब्राह्मणः सपरिवारः तम् अनुसृतवान् ।

हिडिम्बा पुत्रं घटोत्कचं कुतूहलेन पृष्टवती यत् तेन कीदृशः पुरुषः आनीतः ? बालः वा ब्राह्मणः वा स्थविरः वा ? उभौ परिक्रम्य तं पुरुषं प्रति आगतवन्तौ । क्षणेन एव हिडिम्बा ज्ञातवती यत् सः पुरुषः आर्यपुत्रः भीमसेनः । 'उन्मत्तक ! अभिवादय पितरम् ।' इति सा घटोत्कचम् आज्ञापयत् । पितापुत्रौ दृढम् आलिङ्गतः । ततः भीमः वृद्धं ब्राह्मणम् अभिवादयितुम् उक्तवान् । ततः त्रयोऽपि सुपुत्रं सकलत्रं केशवदासं सम्भावयितुं गच्छन्ति । व्यायोगस्य समाप्तिः अनेन भरतवाक्येन भवति- **यथा नदीनां प्रभवः समुद्रः यथाऽऽहुतीनां प्रभवो हुताशनः ।**
**यथेन्द्रियाणां प्रभवं मनोऽपि तथा प्रभुर्नो भगवान् उपेन्द्रः ॥**

कृतेः वैशिष्ट्यम् -

(१) सम्पूर्णः प्रसङ्गः कविना प्रपञ्चितः । (२) ब्राह्मणी हिडिम्बा च शौरसेनीं भाषां प्रयुङ्क्ते । (३) पितापुत्रयोः ईदृशम् अपूर्वं मेलनं भासेन कल्पितम् । (४) व्यायोगेऽस्मिन् मुख्यः रसः वीरः । भायनक-करुण-रौद्रा-ऽद्भूत वत्सल-शृङ्गाररसाः च गौणाः । भरतवाक्यम् उपेन्द्रस्य (श्रीविष्णोः) स्तुतिरूपं वर्तते । इदम् आश्चर्यकरं यत् सः श्लोकः उपेन्द्रवज्रा-वृत्ते संवलितः । इत्यलं विस्तरेण

**( समाप्तम् )**

## मासवार्ता

### आयोजितानि व्याख्यानानि





संस्कृतरसिकाः संस्कृतसाहित्यस्य शास्त्राणां च परिचयं प्राप्नुयुः इति विचार्य एकलव्य - संस्कृत - एकेडेमी, संस्कृतविद्याप्रतिष्ठानं चेरिटेबलट्रस्ट, अमदावाद-संस्कृत-एकेडेमी इत्येतेषां संयुक्तोपक्रमेण संस्कृत-साहित्य-रसास्वाद-व्याख्यानमालायाः आयोजनं नियतं क्रियते । एतस्मिन् एव उपक्रमे संस्थानैः पुराणव्याख्यानमाला आरब्धा वर्तते । आयोजनेऽस्मिन् डिसेम्बरमासस्य ३ दिनाङ्के श्रीशिवम् जोषी (प्राध्यापकः, श्रीब्रह्मर्षि-संस्कृत-महाविद्यालयः) पद्मपुराणविषये, १० दिनाङ्के डॉ. अमृतलालः भोगायता (प्रधानाचार्यः, श्रीब्रह्मर्षि-संस्कृत-महाविद्यालयः) विष्णुपुराणविषये, २४ दिनाङ्के श्रीमहेशभाई जोषी (पुराणप्रवक्ता) शिवपुराणविषये, ३० दिनाङ्के डॉ. योगिनी व्यासः (पूर्व-संस्कृत-विभागाध्यक्षः, उमा आर्ट्स एन्ड नाथीबा कॉमर्स महिला महाविद्यालयः) नारदीयपुराणविषये च व्याख्यानम् अकुर्वन् । व्याख्यानं श्रुत्वा संस्कृतरसिकाः प्रसन्नाः आसन् ।

## कृपया हसन्तु

✍ पू. वन्दनरुचिः विजयः मा. सा.

पतिः - (पत्नीम् उद्दिश्य) किं त्वं जानासि ? यदि पिता अधिकः बुद्धिमान् भवति तर्हि तस्य प्रभावात् पुत्रस्य प्रगतिः अवरुद्धा भवति ।

पत्नी - हे प्रभो ! धन्यवादः । एतस्मिन् विषये मम पुत्रस्य कापि चिन्ता एव नास्ति ।

★ ★ ★ ★ ★

रमणः - (नमनम् उद्दिश्य) अहं समाजसेवां कर्तुम् इच्छामि । किं करवाणि ?

नमनः - कमपि मा पीडयतु । सैव महती समाजसेवा भविष्यति ।

★ ★ ★ ★ ★

नमनस्य पिता नमनस्य उपरि अतीव क्रोधम् अकरोत् । किन्तु तदा नमनः तु उच्चैः अहसत् । उच्चैः हसन्तं नमनं दृष्ट्वा नमनस्य पिता पुनः क्रोधेन नमनम् अपृच्छत् - "भोः त्वं किमर्थं हससि ?"

"भोः पितः ! 'सङ्कटकालेऽपि अस्माभिः सदैव प्रसन्नमुखेनैव स्थातव्यम्' इति भवता एव पाठितम् अस्ति खलु ? अतः हसामि ।"

## सुभाषितम्

- संस्कृतविकिपीडियाजालस्थानात्

**तीव्रोष्णदुर्विषयहवीर्यभृतः परेषां तेजस्विनो न गणयन्ति वपुर्महत्त्वम् ।**
**यत्पद्मरागशकलाकृतिरद्रितुङ्गं कात्स्न्र्येन भस्मयति काष्ठचयं स्फुलिङ्गः ॥**

**तात्पर्यम्** – तीव्रम् उष्णम् असह्यं च वीर्यं ये तेजस्विनः धरन्ति, ते शत्रूणां शरीरवैशाल्यं न गणयन्ति । वह्नेः कणः बहु लघुः चेदपि महान्तं पर्वतसदृशमपि तृणराशिं दहति ।

**तुल्योऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत् ।**
**हिमांशुमाशु ग्रसने तन्म्रदिम्नः स्फुटं फलम् ॥**

**तात्पर्यम्** – सूर्यस्य चन्द्रमसः च समानः दोषः । तथापि राहुः सूर्यं बहुकालानन्तरं गृह्णाति । किन्तु चन्द्रमसं वारं वारं गृह्णाति । अत्र चन्द्रमसः कोमलता एव कारणं भवति ।

**तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।**
**एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥**

**तात्पर्यम्** – उपवेशनाय आसनं, शयनाय स्थलं, पानाय जलं, मृदुवचनं च एते सज्जनानां गृहे सदा भवन्ति एव ।

**तेजस्विनि क्षमोपेते नातिकार्कश्यमाचरेत् ।**
**अतिनिर्मन्थनादग्निश्चन्दनादपि जायते ॥**

**तात्पर्यम्** – क्षमागुणयुक्तः तेजस्वी न कदापि रोषणीयः । यतोहि चन्दनस्य अतीवमन्थनाद् अपि अग्निः उद्भूयते ।

## ज्ञानसरित्

**श्यामः पटेलः**

**प्राचीनकालाद् उपयुज्यमानः पशुः – अश्वः** – मनुष्यः प्राचीनकालादेव पशूनां साहाय्यं प्राप्य सुखं जीवनं यापयन्नस्ति। तादृशेषु सहायकेषु पशुषु विशेषोऽस्ति अश्वः। सः घोटकः, तुरगः, तुरङ्गः, वाजी, हयः, हरिः इत्यादिभिः नामभिः विख्यातः अस्ति। एषः पशुः मनुष्यस्य मित्रतां निर्व्याजं वहन् अस्ति। अश्वारोहणं न केवलम् एकं कौशल्यं वर्तते। किन्तु अभिरुचिरूपेण अपि अश्वारोहणस्य विकासः वर्धमानः अस्ति। विश्वे अश्वानां बह्व्यः प्रजातयः दृश्यन्ते। महाभारतेऽपि अश्वप्रजातीनाम् अन्यतमायाः सिन्धुदेशीयप्रजातेः अश्वानां बहुत्र प्रशंसा कृता अस्ति। यद्यपि वयम् अश्वं जानीमः एव तथापि अद्य अश्वस्य वैशिष्ट्यं ज्ञातुं यतामहे।

अश्वस्य अपत्यं जन्मनः पश्चात् द्वित्रासु घण्टासु एव स्वपादैः उत्थाय चलितुं शक्नोति। अश्वस्य शरीरे २०५ अस्थीनि भवन्ति। अश्वः स्थित्वा एव शयनं कर्तुं समर्थः। शयनकाले उपवेशनस्य आवश्यकता न भवति। अश्वः प्रतिघण्टं प्रायः ४० किलोमीटरमितेन जवेन धावति। केचन प्रशिक्षिताः अश्वाः तु ७० किलोमीटरमितेन वेगेन धावितुं क्षमाः भवन्ति। अश्वस्य नेत्रगोलके तस्य मुखस्य विपरितदिशि भवतः। अतः सः ३६० डिग्रीमितेन कोणेन द्रष्टुम् अर्हः भवति। अश्वस्य मस्तिष्कस्य अपेक्षया दन्तहन्वोः भागः बृहन् भवति। विश्वस्य उन्नततमः अश्वः ८५ इञ्चपरिमितः आसीत्। १७ शताब्दीतः प्रायः सर्वेषु देशेषु स्वस्य आधिकारिकसैन्यदले नगरारक्षकदले च अश्वस्य प्रयोगः आरब्धः वर्तते।



अपत्यम् – offspring, अस्थिन् – bone, अर्ह – fit, हनुः – jaw,

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **आहवः** | युद्ध | war |
| **दर्पः** | अभिमान | ego |
| **निकरः** | समूह | group |
| **नुन्नः ( वि )** | भेजा हुआ | sent |
| **भूधरः** | पर्वत | mountain |
| **चूला** | शिखर | summit/peak |
| **वचः** ( सकारान्तः नपु. ) | वचन | words |
| **अङ्कः** | गोद | lap |
| **व्रीडितः ( वि. )** | लज्जित | ashamed |
| **निखिलः ( वि. )** | समस्त | all |
| **कटाहः** | कडाई | pan |
| **अंशुः** | सूर्य | sun |
| **घ्राणम्** | नासिका | nose |
| **समीहितः ( वि. )** | ईच्छित | desired |
| **महार्णवः** | महासमुद्र | ocean |

## किं भवन्तः जानन्ति ?

**१ ) इन्द्रस्य गजस्य नाम किम् आसीत् ?**
(क) अश्वत्थामा (ख) कुवलयापीडः (ग) अभ्रमुः (घ) ऐरावतः

**२ ) यमराजस्य गजस्य नाम किम् आसीत् ?**
(१) ऐरावतः (ख) महापद्मः (ग) विरूपाक्षः (घ) अश्वत्थामा

**३ ) कुबेरस्य गजस्य नाम किम् आसीत् ?**
क) कुवलयापीडः (ख) महापद्मः (ग) हिमपाण्डुः (घ) शत्रुहन्ता

**४ ) वरुणदेवस्य गजस्य नाम किं वर्तते ?**
(क) सौमनसः (ख) ऐरावतः (ग) कुवलयापीडः (घ) हिमपाण्डुः

**५ ) समुद्रमथनात् एतेषु कः मणिः उत्पन्नः ?**
(क) स्यमन्तकः(ख) स्फटिकः (ग) वैदूर्यः (घ) कौस्तुभः

**६ ) प्रभा, सञ्ज्ञा, रात्रिः, वडवा, छाया च कस्य देवस्य पत्न्यः आसन् ?**
(क) वरुणस्य (ख) यमस्य (ग) कुबेरस्य (घ) सूर्यस्य

**७ ) महर्षिवसिष्ठस्य धेन्वाः नाम किम् आसीत् ?**
(क) नन्दिनी (ख) विपाशा (ग) कपिला (घ) वैजयन्ती

उत्तराणि – (१) घ (२) ख (३) ग (४) क (५) घ (६) घ (७) क

## Programme Schedule - 2023-24

| Sr No | Month | Programme | Duration & Starting Date | Time | Day | Fees(₹) |
|---|---|---|---|---|---|---|
| 1 | Jan | स्तोत्रपाठः ( निश्चितस्तोत्राणि ) | 03/01/23 to 07/02/23 | 06:30pm to 08:00pm | Tuesday -Thursday | 2500/- |
| 2 | Jan | श्रीमद्भगवद्गीता ( Chanting ) | 10/01/23 to 23/02/23 | 06:30pm to 08:00pm | Tuesday -Thursday | 3000/- |
| 3 | Feb | संस्कृतभाषाशिक्षणम् ( प्रथमः स्तरः ) | 15/02/23 to 15/05/23 | 06:30pm to 08:00pm | Monday-Wednesday Friday | 6000/- |
| 4 | Feb | संस्कृतभाषाशिक्षणम् ( तृतीयः स्तरः ) | 15/02/23 to 15/05/23 | 07:00am to 08:30am | Monday-Wednesday Friday | 6000/- |
| 5 | Mar | छन्दःपरिचयः | 01/03/23 to 24/03/23 | 06:30pm to 08:00pm | Wednesday-Friday | 2500/- |
| 6 | May | **ग्रीष्मवर्गः**<br>बालसंस्कृतवर्गः ( Cl.1 to 8 )<br>मार्गदर्शनम्( व्याकरणम् )( Cl.9,10)<br>(with feedback) | 01/05/23 to 11/05/23 | 10:00am to 11:30am<br>08:00am to 09:30am | Daily<br>Daily | 2500/-<br>3500/- |
| 7 | June | सन्धिः | 02/06/23 to 30/06/23 | 06:30pm to 08:00pm | Wednesday-Friday | 3000/- |
| 8 | June | संस्कृतभाषाशिक्षणम् ( द्वितीयः स्तरः ) | 02/06/23 to 28/08/23 | 06:30pm to 08:30pm | Monday-Wednesday Friday | 6000/- |
| 9 | June | संस्कृतभाषाशिक्षणम् ( चतुर्थः स्तरः ) | 02/06/23 to 28/08/23 | 07:00am to 08:30am | Monday-Wednesday Friday | 7000/- |
| 10 | June | Value Education Through Sanskrit<br>बालसंस्कृतवर्गः<br>(Class SKg to 8)<br>Online | 10/06/23 to 23/03/24 | 06:00pm to 07:30pm | Saturday | 7000/- |
| 11 | June | Value Education Through Sanskrit<br>बालसंस्कृतवर्गः<br>(Class SKg to 8)<br>Offline | 11/06/23 to 24/03/24 | 11:00am to 12:30pm | Sunday | 7000/- |
| 12 | June | संस्कृतभाषाशिक्षणम् ( प्रथमः स्तरः ) | 11/06/23 to 24/03/24 | 11:00am to 12:30pm | Sunday | 7000/- |
| 13 | July | स्तोत्रपाठः ( शिवपूजनम्, शिवमहिम्नः स्तोत्रं च ) | 04/07/23 to 03/08/23 | 06:30pm to 08:00pm | Tuesday -Thursday | 2500/- |
| 14 | Aug | स्तोत्रपाठः ( मातृपूजनम्, शक्रादयस्तुतिः च ) | 08/08/23 to 07/09/23 | 06:30pm to 08:00pm | Tuesday- Thursday | 2500/- |
| 15 | Sept | संस्कृतभाषाशिक्षणम् ( तृतीयः स्तरः ) | 04/09/23 to 04/12/23 | 06:30pm to 08:00pm | Monday-Wednesday Friday | 6000/- |
| 16 | Sept | Diploma in Sanskrit Teaching | 05/09/23 to 30/05/24 | 06:00pm to 08:00pm | Tuesday- Thursday | 10000/- |
| 17 | Sept | संस्कृतभाषाशिक्षणम् | 04/09/23 to 04/12/23 | 07:00am to 08:30am | Monday-Wednesday Friday | 6000/- |
| 18 | Nov | **दीपावलीवर्गः**<br>बालसंस्कृतवर्गः ( Cl.1 to 8 )<br>मार्गदर्शनम् ( व्याकरणम् ) ( Cl.9,10 ) | 17/11/23 to 25/11/23 | 10:00am to 11:30am<br>08:00am to 09:30am | Daily<br>Daily | 2500/-<br>2500/- |

EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||

**Published, Printed and Edited by Dr. Mihir Upadhyay**

For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006